शब्दवाच्यत्वे हेतुस्तद्व्याख्याने दर्शितोऽस्माभिः यथा "अस्याश्च तुष्टेरम्भस इव प्रसन्नत्वात् उपदेशरूपशब्दहेतुकत्वाच्च अम्भस्त्वम् अभि—शब्दे इति धातोरसुन्नन्तस्य शब्दहेतुकरूपार्थानुगमात्" । द्यावापृथिव्योः द्वि०व० निरु० । [रा०नि० ।

**अम्भः(म्भसा)सार** न० अम्भसां सारं वा सत्वम् । मुक्तायां

**अम्भः(म्भस्)सू** पु० अम्भांसि सूते सू-क्विप् वा सत्वम् । धूमे हे० ।

**अम्भसांनिधि** पु० ६त० अलुक् स० । समुद्रे "शिखाभिराश्लिष्ट इवाम्भसां निधिः" माघः ।

**अम्भृण** पु० भ्रण—शब्दे यङ् लुक् अच् वेदे नि० । १महति निरु० । २भयङ्करशब्दकारके "पिशङ्गभृष्टिमम्भृणं पिशाचिम्" ऋ० १,१३३,५, "भयङ्करशब्दायमानमतिप्रवृद्धं वेति" भा० । "कुम्भीभ्यामम्भृणौ सुते" य० १६,२७ ।

**अम्भोज** न० अम्भसि जायते जन—ड ७त० । १पद्मे "गिरा सुखाम्भोजमियं युयोज" नैष० । "वक्त्राम्भोजं सरस्वत्यधिवसति सदा शोण एवाधरस्ते" का०प्र० । २सारसे ३चन्द्रे "पिबन्ति त्वन्मुखाम्भोजच्युतं हरिकथामृतमिति" भाग० । चन्द्रादेवामृतच्युति सम्भवः ४कर्पूरे च पु० । ५शङ्खे पु०न० । ६जलजातमात्रे त्रि० ।

**अम्भोज(ख)षण्ड** न० अम्भोजानां समूहः (ख)षण्डच् । पद्मसमूहे "कुमुदवनमुपश्रि श्रीमदम्भोजख(ष)ण्डम्" माघः ।

**अम्भोजजन्मन्** पु० अम्भोजाज्जन्म यस्य जन्माद्युत्तरपदो व्यधिकरणोऽपि साधु वामनः । चतुर्मुखे हरिनाभिपद्मजे ब्रह्मणि अब्जजशब्दे विवरणम् । "अम्भोजजन्मजनिस्तदन्तरगतो वत्सानितो वत्सपान्" भाग० अम्भोजजन्मनः हिरण्यगर्भस्य जनिरुत्पत्तिर्यस्मात् तथाविधो विष्णुरित्यर्थः ।

**अम्भोजयोनि** पु० अम्भोजं हरिनाभिपद्मं योनिः उत्पत्तिस्थानं यस्य । विधातरि । अब्जजशब्दे विवरणम् । "मदनमुपगतोऽहं पूर्व्वमम्भोजयोनेरिति" प्रबो० ।

**अम्भोजिनी** स्त्री अम्भोज+समूहार्थे, तद्वति देशे वा पुष्करा० इनि । १पद्मसमूहे, २ लतारूपे पद्मयुक्तदेशे च ।

**अम्भोद** पु० अम्भो ददाति दा—क । १मेघे, २मुस्तके च । ३जलदानकर्त्तरि त्रि० । [२मुस्तके ३समुद्रे, च ।

**अम्भोधर** पु० अम्भो धरति धृञ्—धारणे अच् । १मेघे ।

**अम्भोधि** पु० अम्भांसि धीयन्ते यत्र धा—आधारे कि । समुद्रे । "सम्भूयाम्भोधिमभ्येति महानद्या नगापगा" । "अम्भोधिरोधसि पृथुप्रतिमानभागेति" "अम्भोधिर्विकसित वारिजाननोऽसौ" इति च माघः ।

**अम्भोधिवल्लभ** पु० ६त० । प्रवाले राजनि० ।

**अम्भोनिधि** पु० अम्भांसि निधीयन्तेऽत्र अम्भस्-नि+धा-कि । १समुद्रे । "मैनाकमम्भोनिधिबद्धसख्यम्" कु० "अम्भोनिधिर्वहति दुर्वहबाड़वाग्निम्" चौ० प० । [समुद्रे ।

**अम्भोराशि** च० अम्भसां राशिरिव एकत्रोपचितत्वात् ।

**अम्भोरुह** न० अम्भसि रोहति रुह—क । १पद्मे २सारसे च ३जलजातमात्रे त्रि० "हेमाम्भोरुहशस्यानां तद्वाप्यो धाम साम्प्रतम्" कुमा० ।

**अम्मय** त्रि० अपां विकारादि अप्+मयट् । १जलविकारे २जलप्रचुरे च "सौरीभिरिव नाड़ीभिरमृताख्याभिरम्मयः" रघुः । "नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः" भाग० ।

**अम्र** पु० अमति सौरभेण दूरं गच्छति अम—रन् । आम्रवृक्षे । फलपत्रादौ न० । एवं प्रायः सर्व्वत्र वृक्षवाचकेषु ।

**अम्रा(म्ला)त** पु० अम्लं रसं सर्व्वत्र पत्रपुष्पादौ अतति व्याप्नोति अत—अण् वा रस्य लत्वम् । (आमड़ा) आम्रातकवृक्षे । स्वार्थे कन् अम्रा(म्ला)तकोऽपि ।

**अम्ल** न० अम—क्त । (घोल) १तक्रे । (टक)रसभेदे पु० । ३ तद्वति त्रि० "कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः" गीता । अम्लरसद्रव्याणि च सुश्रुते दर्शितानि यथा । दाड़िमामलकमातुलुङ्गाम्रातककपित्थकरमर्द्दवदरकोलप्राचीनामलकतिन्तिड़ीककोशाम्रभव्यपारावतवेत्रफललकुचाम्लवेतसदन्तशठदधितक्रसुराशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लोवर्गः" ।

**अम्लक** पु० अल्पोऽम्लः अल्पार्थे कन् । (मान्दार) लकुचवृक्षे ।

**अम्लकाण्ड** न० अम्लं काण्डं यस्य । लवणतृणे राजनि० ।

**अम्लकेशर** पु० अम्लः केशरोऽस्य । वीजपूरे (गोंड़ानेवु) ।

**अम्लचूड** पु० अम्ला चूड़ा शिखाऽस्य । अम्लशाके ।

**अम्लजम्बीर** पु० अम्लो जम्बीरः । (गोंड़ानेवु)जम्बीरवृक्षे ।

**अम्लनायक** पु० अम्लं रसं नयति नी—ण्वुल् । अम्लवेतसे ।

**अम्लनिशा** स्त्री अम्लरसे निःशेषेण शेते शीङ् ड । शठीवृक्षे

**अम्लपञ्चफल** त्रि० "कोलं च दाड़िमञ्चैव वृक्षाम्लं चूक्रिका तथा । अम्लवेतसमित्येतदम्लपञ्चफलं स्मृतम्" जम्बीरं नागरङ्गञ्च तथाम्लवेतसं पुमः । तिन्तिड़ीकं वीजपूरमम्लपञ्चफलं स्मृतमिति चोक्तं फलपञ्चके ।

**अम्लपत्र** पु० अम्लं पत्रं यस्य । अश्मन्तकवृक्षे ।

**अम्लपत्री** स्त्री अम्लं पत्रं यस्याः ङीप् । पलाशीलतयाम् ।

**अम्लपनस** पु० अम्लः पनसः कर्म्म० । (मान्दार) लकुचवृक्षे ।

**अम्लपित्त** त्रि० अम्लाय पित्तम् । रोगभेदे यत्र भुक्तं सर्व्वं